# ॥ श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं तत्त्वसङ्ख्यानम् ॥

॥ हरिः ॐ ॥

स्वतन्त्रं अस्वतन्त्रं च द्विविधं तत्त्वमिष्यते ।
स्वतन्त्रो भगवान् विष्णुः भावाभावौ द्विधेतरत् ॥ १ ॥

प्राक् प्रध्वंससदात्वेन त्रिविधोऽभाव इष्यते ।
चेतनाचेतनत्वेन भावोऽपि द्विविधो मतः ॥ २ ॥

दुःखस्पृष्टं तदस्पृष्टं इति द्वेधैव चेतनम् ।
नित्यादुःखा रमाऽन्ये तु स्पृष्टदुःखाः समस्तशः ॥ ३ ॥

स्पृष्टदुःखा विमुक्ताश्च दुःखसंस्था इति द्विधा ।
दुःखसंस्था मुक्तियोग्या अयोग्या इति च द्विधा ॥ ४ ॥

देवर्षि पितृ प नरा इति मुक्तास्तु पञ्चधा ।
एवं विमुक्तियोग्याश्च तमोगाः सृतिसंस्थिताः ॥ ५ ॥

इति द्विधा मुक्त्ययोग्याः दैत्य रक्षः पिशाचकाः ।
मर्त्याधमाश्चतुर्धैव तमोयोग्याः प्रकीर्तिताः ॥ ६ ॥

ते च प्राप्तान्धतमसः सृतिसंस्था इति द्विधा ।
नित्यानित्यविभागेन त्रिधैवाचेतनं मतं ॥ ७ ॥

नित्या वेदाः पुराणाद्याः कालः प्रकृतिरेव च ।

नित्यानित्यं त्रिधा प्रोक्तं अनित्यं द्विविधं मतं ॥ ८ ॥

असंसृष्टं च संसृष्टं असंसृष्टं महानहं ।
बुद्धिर्मनः खानि दशमात्रा भूतानि पञ्च च ॥ ९ ॥

संसृष्टमंडं तद्गं च समस्तं संप्रकीर्तितम् ।
सृष्टिः स्थितिः संहृतिश्च नियमोऽज्ञान बोधने ॥ १० ॥

बन्धो मोक्षः सुखं दुःखमावृतिर्ज्योतिरेव च ।
विष्णुनाऽस्य समस्तस्य समासव्यासयोगतः ॥ ११ ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं तत्त्वसङ्ख्यानप्रकरणं सम्पूर्णम् ॥

॥ श्री कृष्णार्पणमस्तु ॥